ॐ श्रीविजयीन्द्रतीर्थविरचितम्

श्रीव्यासराजस्तोत्रम्

वन्दे मुकुन्दमरविन्दभवादिवन्द्यम्
इन्दिन्दिराप्रततमेचकमाकटाक्षम् ।
बन्दीकृतामरममन्दमतिं विदद्ध्यात्
आनन्दतीर्थ हृदयाम्बुजमत्तभृङ्गः ॥ १॥

श्रीव्यासयोगी हरिपादरागी
भक्तादिपोगी हितदक्षसद्गीः ।
त्यागी विरागी विषयेषु भोगी
मुक्तौ सदा गीतसुरेन्द्रसङ्गी ॥ २॥

लक्ष्मीशपादाम्बुजमत्तभृङ्गः
सदा दशप्रज्ञनयप्रसङ्गः ।
अद्वैतवादे कृतमूलभङ्गः
महाव्रतीशो विषयेष्वसङ्गः ॥ ३॥

सदा सदायत्तमहानुभावः
भक्ताघतोलोच्चयतीव्रदावः ।
दौर्जन्यविध्वंसनदक्षरावः
शिष्याश्रयो यच्छ्रुतिदिव्यगावः ॥ ४॥

अद्वैतदावानलकालमेघः
रमारमस्नेहविदारिताघः ।
वाग्वैखरीनिर्जितसज्जनौघः

मायामतव्रातहिमे निदाघः ॥ ५ ॥

मध्वसिद्धान्तदुग्धाब्धिवृद्धि पूर्णकलाधरः ।
व्यासराजयतीन्द्रो मे भूयादीप्सितसिद्धये ॥ ६ ॥

यन्नामग्रहणादेव पापराशिः पलायते ।
सोऽयं श्री व्यासयोगीन्द्रो निहन्तु दुरितानि नः ॥ ७ ॥

यन्मृत्तिकादर्शनमात्रभीतः
क्वचित् पिशाचस्तदनुव्रतेभ्यः ।
दत्वा धनं वाँछितमाप्य तस्य
तैर्वा जितोऽयादचिरेण मुक्तिम् ॥ ८ ॥

यत्कौशिकानासिकाक्तजलान्निः शङ्किते नरे ।
व्याघ्रो महानपि स्प्रष्टुं नाशकत्वा मिहाश्रये ॥ ९ ॥

द्वात्रिंशत्सप्तशतकमूर्तिर्हनुमतः प्रभोः ।
प्रतिष्ठाता स्मृतिख्यातस्तं भजे व्यासयोगिनम् ॥ १० ॥

सीमानं तत्र तत्रैत्य क्षेत्रेषु च महामतिः ।
व्यवस्थाप्यात्र मर्यादां लब्धवांस्त मिहाश्रये ॥ ११ ॥

मध्वदेशिकसिद्धान्त प्रवर्तकशिखामणिः ।
सोऽयं श्रीव्यासयोगीन्द्रो भूयादीप्सित सिद्धये ॥ १२ ॥

भूतप्रेतपिशाचाद्या यस्य स्मरणमात्रतः ।
पलायन्ते श्रीनृसिंह स्थानं तमहमाश्रये ॥ १३ ॥

वातज्वराऽदि रोगाश्च भक्तया यमुपसेविनः ।
दृढव्रतस्य नश्यन्ति पिशाचाश्च तमाश्रये ॥ १४ ॥

तारपूर्णं बिन्दुयुक्त प्रथमाक्षरपूर्वकम् ।
चतुर्थ्यन्तं च तन्नाम नमः शब्दान्तभूषितम् ॥ १५ ॥

पाठयन्तं मध्वनयं मेधगम्भीरया गिरा ।
ध्यायन्नावर्तयेद्यस्तु भक्तया मेधां स विन्दते ॥ १६ ॥

रत्नसिंहासनाऽरूढं चामरैरभिवीजितम् ।
ध्यायन्नावर्तते यस्तु महतीं श्रीयमाप्नुयात् ॥ १७॥

प्रह्लादस्यावतारोऽसाविन्द्रस्याऽनुप्रवेशवान् ।
तेन तत्सेविनां नृणां सर्वमेतद्भवेद् ध्रुवम् ॥ १८॥

नमो व्यासमुनीन्द्राय भक्ताभीष्टप्रदायिने ।
नमतां कल्पतरवे भजतां कामधेनवे ॥ १९॥

व्यासराजगुरो मह्यं त्वत्पादाम्बुजसेवनात् ।
दुरितानि विनश्यन्तु यच्छ शीघ्रं मनोरथान् ॥ २०॥

यो व्यासत्रय सञ्ज्ञकान् दृढतरान् मध्वार्य शास्त्रार्थकान्
रक्षद्वज्रशिलाऽकृतीन् बहुमतान् कृत्वा परैर्दुस्तरान् ।
प्रायच्छन्निजपादपद्म सरसीजाऽसक्त नृणां मुदा
सोऽयं व्यासमुनीश्वरो भवतु मे तापत्रयक्षान्तये ॥ २१॥

मध्वभक्तो व्यासशिष्य पूर्णप्रज्ञमतानुगः ।
व्यासराजमुनिश्रेष्ठः पातु नः कृपया गुरुः ॥ २२॥

व्यासराजो व्यासराज इति भक्त्या सदा जपन् ।
मुच्यते सर्वदुःखेभ्यः तदन्तर्यामिणो बलात् ॥ २३॥

स्तुवन्नेनेन मन्त्रेण व्यासराजाय धीमते ।
अभिषेकार्चनादीन्यः कुरुते स हि मुक्तिभाक् ॥ २४॥

गुरुभक्त्या भवेद्विष्णुभक्तिरव्यभिचारिणी ।
तया सर्वं लभेद्धीमांस्तस्मादेतत्सदा पठेत् ॥ २५॥

इति श्रीपरमहंसपरिव्राजकाऽचार्याणां श्रीसुरेन्द्रतीर्थपूज्यपादानां शिष्येण

श्रीविजयीन्द्रतीर्थविरचितं श्रीव्यासराजस्तोत्रं संपूर्णम्
